अमरः। कलावचशब्दे २१८५ पृ० तद्भेदादि दृश्यम्।

**शक्रफला(ली)** स्त्री शक्रस्य इव स्थूलान्यपि फलान्यस्याः वा ङीप्। शमीवृक्षे शब्दच०। [भेदे

**शक्ति(क्त्रि)** पु० वशिष्ठमुनेः पुत्रे पराशरस्य पितरि मुनि-

**शक्नु** त्रि० शक–नु। प्रियभाषिणि अमरः।

**शक्य** त्रि० शक–यत्। १शक्तियुक्ते २शक्त्या बोध्येऽर्थे। ३समर्थनीये। ४साधयितुं योग्ये च।

**शक्यतावच्छेदक** त्रि० ६त०। शक्यपदार्थस्यासाधारणधर्मे येन धर्मेण अर्थस्य शब्दसङ्केतविषयता तस्मिन् धर्मे। यथा घटशब्दः घटत्ववन्तं पदार्थं बोधयति अतस्तदसाधारणधर्मो घटत्वं घटशब्दस्य शक्यतावच्छेदकम्।

**शक्र** पु० शक–रक्। १इन्द्रे अमरः। २कुटजवृक्षे ३अर्जुनवृक्षे मेदि०। ४ज्येष्ठानक्षत्रे ५पेचके च। इन्द्रस्य चतुर्दशविधत्वम् मन्वन्तरभेदेन इन्द्रशब्दे दर्शितमतः तत्संख्यासाम्यात् ६चतुर्दशसंख्यायाम्।

**शक्रगोप** पु० शक्रं शक्रधनुर्गोपायति समवर्णत्वात् गुप–अण्। इन्द्रगोपे कीटे जटा०।

**शक्रज** पु० शक्रात् जायते जन–ड। १काके त्रिका०। २इन्द्रजन्ये त्रि०। शक्रजातादयोऽप्यत्र।

**शक्रजित्** पु० शक्रं जितवान् जि–क्विप् तुक् च। १रावणात्मजे मेघनादे राक्षसे। २इन्द्रजेतरि त्रि०।

**शक्रधनुस्** न० ६त०। मेघलाञ्छने धनुराकारे सूर्यकिरणसम्पर्कजे पदार्थभेदे (रामधनुक) अमरः।

**शक्रध्वज** पु० ६त०। भाद्रशुक्लद्वादश्यां पूज्ये इन्द्रदैवते ध्वजाकारे पदार्थे। इन्द्रध्वजशब्दे ८४६ पृ० दृश्यम्।

**शक्रनन्दन** पु० ६त०। अर्जुने जटा०। २इन्द्रनन्दके त्रि०।

**शक्रपर्य्याय** पु० शक्रस्य पर्य्यायो नाम नाम यस्य मध्यपदलोपः। १कुटजवृक्षे रत्नमाला ६त०। इन्द्रस्य २वाचकशब्दे च।

**शक्रपादप** पु० ६त०। १देवदारुवृक्षे अमरः। २कुटजवृक्षे राजनि०। [अमरः। स्वार्थे क। तत्रैव रत्नमा०।

**शक्रपुष्पी** स्त्री शक्रस्येव पुष्पमस्याः ङीप्। अग्निशिखावृक्षे

**शक्रभवन** न० ६त०। स्वर्गे त्रिका०। शक्रावासादयोऽप्यत्र।

**शक्रभूभवा** स्त्री शक्रस्तद्भुवि भवति भू–अच्। इन्द्रवारुण्याम् शब्दच०। [२इन्द्रजनन्याम् अदित्याम्।

**शक्रमातृ** स्त्री शक्रस्य मातेव। १भार्ग्याम् राजनि०। ६त०।

**शक्रमूर्द्धन्** पु० शक्रस्येव शिखावान् मूर्द्धा यस्य। १वल्मीके त्रिका०। ६त०। २इन्द्रमस्तके। शक्रशीर्षादयोऽप्यत्र।

**शक्रवल्ली** स्त्री शक्रप्रिया वल्ली। इन्द्रवारुण्याम् राजनि०।

**शक्रवाहन** पु० शक्रं वाहयति वह–णिच्–ल्यु। मेघे शब्दच०। इन्द्रवाहनादयोऽप्यत्र।

**शक्रबीज** न० शक्रस्य कुटजस्य बीजम्। इन्द्रयवे राजनि०।

**शक्रशाखिन्** पु० शक्रनामकः शाखी। कुटजवृक्षे भावप्र०।

**शक्रसारथि** पु० ६त०। इन्द्रसारथौ मातलौ।

**शक्रसुत** पु० शक्रस्य सुतः। १वालिनामके वानरराजे हलायु०। २इन्द्रपुत्रे अर्जुने च।

**शक्रसुधा** स्त्री शक्रस्य सुधेव। पालङ्क्याम् शब्दच०।

**शक्रसृष्टा** स्त्री ६त०। हरीतक्याम् त्रिका०।

**शक्राख्य** पु० शक्रस्येवाख्या यस्य। १पेचके त्रिका०।

**शक्राणी** स्त्री शक्रस्य पत्नी ङीष् आनुक् च। पुलोमजायामिन्द्रपत्न्याम् शब्दमा०।

**शक्राशन** न० शक्रो भाग्यते अश–कर्मणि ल्युट्। भङ्गायाम् "शक्राशनन्तु तीक्ष्णोष्णं मोहकृत् कुष्ठनाशनम्। बलमेधाग्निदं श्लेष्मदोषहारि रसायनम्" राजव०।

**शक्राशन** पु० शक्रं तन्नामस्नुते व्याप्नोति अश–ल्यु। कुटजवृक्षे शब्दच०। [संक्षिप्तसारः।

**शक्रि** पु० शक–क्रिन्। १मेघे २वज्रे ३गजे ४पर्वते च

**शक्रोत्थान** न० शक्रस्य तद्ध्वजस्य उत्थानम्। भाद्रशुक्लद्वादश्यां कर्त्तव्ये १शक्रध्वजस्योत्थाने, तदुपलक्षिते २उत्सवे च। इन्द्रध्वजशब्दे ८४६पृ० दृश्यम्।

**शक्व** पु० शक–वन्। गजे सि० कौ०।

**शङ्क** पु० शक–अच् वा+नुम्। शकटादिवाहकवृषे हारा०।

**शङ्कर** पु० शं करोति कृ–अच्। १महादेवे २कल्याणकरे त्रि० ३शिवल्यां स्त्री ङीप्। ४सा च मञ्जिष्ठायां शब्दच०। ५शम्यां राजनि०। [शुभत्वात्। २कर्पूरे राजनि०।

**शङ्करावास** पु० ६त०। १कैलासाचले। शङ्करस्यावास इव

**शङ्का** स्त्री शकि–अ। १त्रासे २वितर्के मेदि० ३संशये च।

**शङ्कित** त्रि० शङ्का जातास्य तार० इतच्। १भीते त्रिका० २सन्दिग्धे ३वितर्किते च।

**शङ्कु** पु० शकि–उण्। १स्थाणौ। २मत्स्यभेदे। ३शल्यास्त्रे अमरः। ४कीलके। ५दशकोटिसंख्यायाम् ६तत्संख्याते। ७महादेवे। ८कलुषे मेदि०। ९पत्रशिराजाले १०मेढ्रे हेमच०। ११नखीनामद्रव्ये जटा०। १२छायापरिमाणार्थे काष्ठादिनिर्मिते, "अर्काङ्गुला तु छायापि काष्ठी द्व्यङ्गुलमूलिका। शङ्कुसंज्ञा भवेच्चैव तच्छायां परिकल्पयेत्" इत्युक्ते १३कीलभेदे च ज्यो०त०। १४जनमेजयपुत्रभेदे भा० आ० ९५ अ०। १५नवरत्नान्त-